त्रि· श्रीगणेशायनमः॥ ॐ॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा॥ शास्त्रानुपूर्वंतद्विद्याद्य
१ थोक्तंलोकवेदयोः॥१॥ प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः॥ पुनर्व्यक्तीकरिष्यामिवाच
उच्चारणेविधिं॥२॥ त्रिषष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेमताः॥ प्राकृतेसंस्कृतेचापिस्व
यंप्रोक्ताःस्वयंभुवा॥३॥ स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः॥ यादयश्चस्मृताह्यष्टौ
चत्वारश्चयमाःस्मृताः॥४॥ अनुस्वारोविसर्गश्चᳲकᳳपौचापिपराश्रितौ॥ दुःस्पृष्टश्चेतिविज्ञे
योऌकारःप्लुतएवच॥५॥१॥ आत्माबुद्ध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया॥ मनःकाया १

ग्निमाहंतिसप्रेरयतिमारुतं॥ मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं॥ प्रातःसवनयोगंतंछंदोगायत्र
माश्रितं॥ कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं॥ तारंतार्तीयसवनंशीर्षण्यंजागतानुगं॥ सो
दीर्णोमूर्ध्न्यभिहतोवक्त्रमापद्यमारुतः॥ वर्णाञ्जनयतेतेषांविभागःपंचधास्मृतः॥ स्वरतःका
लतःस्थानात्प्रयत्नानुप्रदानतः॥ इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत॥२॥ उदात्तश्चानुदा
त्तश्चस्वरितश्चस्वरास्त्रयः॥ ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअचि॥ उदात्तेनिषादगां
धारावनुदात्तऋषभधैवतौ॥ स्वरितप्रभवाह्येतेषड्जमध्यमपंचमाः॥ अष्टौस्थानानि
वर्णानामुरःकंठःशिरस्तथा॥ जिह्वामूलंचदंताश्चनासिकोष्ठौचतालुच॥ ओभाव
श्चविवृत्तिश्चशषसारेफएवच॥ जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः॥ यद्यो

शि. २ भावप्रसंधानमुकारादिपरंपदं ।। स्वरांतं नादृत्रां विद्यादन्यद्व्यक्तमूष्मणः ।। ३ ।। ह
कारं पंचमैर्युक्तमंतस्थाभिश्च संयुतं ।। औरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतं ।। कं
ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।। स्युर्मूर्धन्या ऋटुरषा दंत्या लृतुलसाः स्मृताः
जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वः स्मृतो बुधैः ।। एऐ तु कंठ्यतालव्या ओ औ कंठोष्ठजौ
स्मृतौ ।। अर्धमात्रा तु कंठ्या स्यादेकारैकारयोर्भवेत् ।। ओकारौकारयोर्मात्रा तयोर्वि
वृतसंवृतं ।। संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकं ।। घोषा वा संवृताः सर्वे अघो २
षा विवृताः स्मृताः ।। ४ ।। स्वराणामूष्मणां चैव विवृतं करणं स्मृतं ।। तेभ्योपि विवृता

वेङौ ताभ्यामैचौ तथैव च ।। अनुस्वारयमाणां च नासिकास्थानमुच्यते ।। अयोगवाहा वि
ज्ञेया आश्रयस्थानभागिनः ।। अलाबुवीणानिर्घोषो दंत्यमूल्यस्वराननु ।। अनुस्वार
स्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ।। अनुस्वारे विवृत्त्यां तु विरामे चाक्षरद्वये ।। द्विरोष्ठ्यौ तु वि
गृह्णीयाद्यत्रौकारवकारयोः ।। व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् ।। भीता प
तनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ।। ५ ।। यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते ।। एवं रंगाः प्र
योक्तव्याः खे अराँ इव खेदया ।। रंगवर्णं प्रयुंजीरन्नो ग्रसेत्पूर्वमक्षरं ।। दीर्घस्वरं प्रयुंजीयात्पश्चा
न्नासिक्यमाचरेत् ।। हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि ।। नासिकायां तथार्धं च रंग

स्यैवंद्विमात्रता॥ह्रस्वयाद्युत्करेनित्यंकांस्येनसमनुस्वरन्॥मार्दवंचद्विमात्रंचजघन्वांइतिनिदर्शनं॥
मध्येतुकंपयेत्कंपमुभौपार्श्वौसमौभवेत्॥सरंगंकंपयेत्कंपरथीवेतिनिदर्शनं॥एवंवर्णाःप्र
योक्तव्यानाव्यक्तानचपीडिताः॥सम्यक्वर्णप्रयोगेणब्रह्मलोकेमहीयते॥६॥गीतीशीघ्री
शिरःकंपीतथालिखितपाठकः॥अनर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः॥माधुर्यमक्षरव्य
क्तिःपदच्छेदस्तुसुस्वरः॥धैर्यंलयसमर्थंचषडेतेपाठकागुणाः॥शंकितंभीतमुद्घुष्टमव्यक्त
मनुनासिकं॥काकस्वरंशिरसिगंतथास्थानविवर्जितं॥उपांशुदष्टंत्वरितंनिरस्तंविलंबि
तंगद्गदितंप्रगीतं॥निष्पीडितंग्रस्तपदाक्षरंचवदेन्नदीनंनतुसानुनास्यं॥प्रातःपठेन्नि ३

समुरस्थितेनस्वरेणशार्दूलरुतोपमेन॥मध्यंदिनेकंठगतेनचैवचक्राह्वसंकूजितसंनिभेन॥
तारंतुविद्यात्सवनंतृतीयंशिरोगतंतच्चसदाप्रयोज्यं॥मयूरहंसान्यभृतस्वराणांतुल्येनना
देनशिरस्थितेन॥ ७ ॥अचोस्पृष्टायणस्त्वीषन्नेमिःस्पृष्टाःशलस्मृताः॥शेषाःस्पृष्टाहलः
प्रोक्तानिबोधानुप्रदानतः॥ञमोनुनासिकानह्रौनादिनोहशषःस्मृताः॥ईषन्नादायणोज
श्श्वासिनस्तुखफादयः॥ईषच्छ्वासांश्चरोविद्याद्गोर्धामैतत्प्रचक्षते॥दाक्षीपुत्रःपाणि
निनायेनेदंव्यापितंभुवि॥छंदःपादौतुवेदस्यहस्तौकल्पोथपठ्यते॥ज्योतिषामयनंच
क्षुर्निरुक्तंश्रोत्रमुच्यते॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं॥तस्मात्सांगम

प्रत्ययस्मृतः ॥ ९ ॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः ॥ शिखी रौति त्रिमात्रं तु नकुलस्त्व
र्धमात्रकं ॥ कुतीर्थादागतं दग्धमपवर्णं च भक्षितं ॥ न तस्य पाठे मोक्षोस्ति पापाहेरिव किल्बि
षात् ॥ सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितं ॥ सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः
स्वरतोपराधात् ॥ अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितं ॥ अक्षता शस्त्ररूपेण वज्रं पतति
मस्तके ॥ हस्तहीनं तु योधीते स्वरवर्णविवर्जितं ॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ।
हस्तेन वेदं योधीते स्वरवर्णार्थसंयुतं ॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ १० ॥ शंक
रः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते ॥ वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ येनाक्ष

शि० ५

रसमाम्नायमधिगम्य महेश्वरात् ॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ येन धौता गिरः पुंसां
विमलैः शब्दवारिभिः ॥ तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ अज्ञानांधस्य लोकस्य ज्ञानांज
नशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ त्रिनयनमभिमुखनिःसृतामिमां
य इह पठेत्प्रयतश्च सदा द्विजः ॥ स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं स
मश्नुते दिवीति दिवीति ॥ ६० ॥ ११ ॥ अथात्रासामात्मोदात्तमहंकारं स्वराणां यथागीत स
चोस्पृशेदात्तं चापस्कत्रां कर एकादश ॥ ११ ॥ इति शिक्षा समाप्तः ॥ श्रीरङ्गेश्वरार्प
णमस्तु ॥ (शके १७७३ विरोधकृन्नामसंवत्सरे श्रावण शु ७ सायंकाल सं ॥ ५